# ॥ નારાયણ સૂકતમ ॥

ૐ સહ નાવવતુ ।
સહનૌ ભુનકતુ ।
સહ વીર્ય કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ ।
મા વિદ્વિષાવહૈ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

સહસ્ર શીર્ષ દેવં વિશ્વાક્ષં વિશ્વ શંભુવમ ।
વિશ્વં નારાયણં દેવમક્ષરં પરમં પદમ ।
વિશ્વતઃ પરમાન્નિત્યં વિશ્વં નારાયણગં હરિમ ।
વિશ્વમે વેદં પુરુષ–સ્તદ્વિશ્વ–મુપજીવતિ ।
પતિં વિશ્વસ્યાત્મેશ્વરગં શાશ્વતગં શિવ–મચ્યુતમ ।
નારાયણં મહાજ્ઞેયં વિશ્વાત્માનં પરાયણમ ।
નારાયણપરો જ્યોતિરાત્મા નારાયણઃ પરઃ ।
નારાયણ પરં બ્રહ્મ તત્ત્વં નારાયણઃ પરઃ ।
નારાયણ પરો ધ્યાતા ધ્યાનં નારાયણઃ પરઃ ।
યચ્ચ કિંચિજ્જગત્સર્વં દૃશ્યતે શ્રૂયતેઽપિ વા ॥

અંતર્બહિશ્ચ તત્સર્વં વ્યાપ્ય નારાયણઃ સ્થિતઃ ।
અનંતમવ્યયં કવિગં સમુદ્રેઽંતં વિશ્વ શંભુવં ।
પદ્મકોશ પ્રતીકાશગં હૃદયં ચાપ્યધોમુખં ।
અધો નિષ્ટયા વિતસ્ત્યાંતે નાભ્યામુપરિ તિષ્ઠતિ
જ્વાલમાલાકુલં ભાતી વિશ્વસ્યાયતનં મહત ।
સંતતગં શિલાભિસ્તુ લંબત્યાકોશ સન્નિભમ ।
તસ્યાંતે સુષિરગં સૂક્ષ્મં તસ્મિન સર્વં પ્રતિષ્ઠિતં ।
તસ્ય મધ્યે મહાનગ્નિર્વિશ્વાર્ચિ ર્વિશ્વતોમુખઃ ।
સોઽગ્ર ભુગ્વિ ભજંતિષ્ઠ–ન્નાહારમજરઃ કવિઃ ।
તિર્યગૂર્ધ્વ મધશ્શાયી રશ્મયસ્તસ્ય સંતતા ।

સંતાપચતિ સ્વં દેહમાપાદ તલ મસ્તકઃ ।
તસ્ચ મધ્યે વહ્નિશિખા અણીચોર્ધ્વા વ્યવસ્થિતઃ ।
નીલતો– ચદમધ્યસ્થા દ્વિધુલ્લેખેવ ભાસ્વરા ।
નીવાર શૂક વત્તન્વી પીતા ભાસ્વત્યણૂપમા ।
તસ્યાઃ શિખાચા મધ્યે પરમાત્મા વ્યવસ્થિતઃ ।
સ બ્રહ્મ સ શિવઃ સ હરિઃ સેંદ્રઃ સોટક્ષરઃ પરમઃ સ્વરાટ ॥

ઋતગં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિંગળં ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ॥

ॐ નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ ।
તન્નો વિષ્ણુઃ પ્રચોદયાત ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ